# केचन वेदभाष्यकाराः धर्ममनीषिणश्च

- देवेन्द्रनाथपाण्डेयः
शत्रुघ्नपाणिग्राही

Scanned with CamScanner

# केचन वेदभाष्यकाराः धर्ममनीषिणश्च

प्रो. देवेन्द्रनाथपाण्डेयः
डॉ. शत्रुघ्नपाणिग्राही

नवजीवन पब्लिकेशन

Scanned with CamScanner

# केचन वेदभाष्यकाराः धर्ममनीषिणश्च

- प्रो. देवेन्द्रनाथपाण्डेयः
डॉ. शत्रुघ्नपाणिग्राही

© Author

प्रथम संस्करण – 2017

मूल्य : 750/-

ISBN : 978-81-8268-194-1

*All rights reserved. No part of the book may be reproduced or utilized in any form or by any means, electronic, mathematical, including photocopying, recording or by any information storage or retrieval system without permission in writing from the publisher.*

**प्रकाशक**

**नवजीवन पब्लिकेशन**

*हैड ऑफिस :*
'नवजीवन कॉम्पलेक्स'
निवाई (टोंक–राज.) भारत
☎ : 01438- 222127, 228377
Email : bbc.jain@gmail.com

**ब्रांच ऑफिस :**

**बाण वालों का दरवाजा, चौड़ा रास्ता, जयपुर**

***मुद्रक :***

**नवजीवन ऑफसेट**

Scanned with CamScanner

# प्राक्कथनम्

जीवनमूल्यघटकतत्त्वेष्वन्यतमं तत्त्वमस्ति धर्मतत्त्वम्। तत्तत्त्वस्याधिष्ठानमस्ति बुद्धितत्त्वम्। बुद्धेः सात्त्विकादिप्रकारत्रयेऽपि मानवबुद्धेः क्वचिच्चान्यजीवेष्वपि तत्प्राधान्याच्च गोहस्त्यादिषु धर्मतत्त्वं प्रायोगिकं व्यावहारिकं च प्रतीयते। तत्रापि विशेषरूपेण मानवबुद्धेः उत्कृष्टत्वात्परिशीलनपूर्वकं विवेकपूर्वकं धर्मतत्त्वमाचाररूपेऽनूद्य पाल्यते। सत्यमवितथं शाश्वतं, सार्वकालिकं सार्वजनीनं विश्वभूमिव्यापकञ्च यद् भवति; तदेव मानवैः सत्यधर्मः विश्वमानवान् एकस्मिन् सूत्रे निबध्नाति, सूत्रात्मत्वेनैकस्मिन् मानवता-मूल्ये वासयति। तदेवाऽस्ति धर्मोविश्वस्य जगतः प्रतिष्ठा। अस्यां प्रतिष्ठायां सभ्यसमाजस्य, शिष्टसमाजस्य, सर्वोत्कृष्टसमाजस्य च प्रतिष्ठा निहिता मन्यते । विश्वस्मिन् भौतिक-दिव्याध्यात्मिकरूपेषु मानवानां जीवनं सर्वदैव विभक्तं भवद् बभूव। विश्वस्य संघीयं स्वरूपमप्यस्मादेव सत्यधर्मकारणात्सुस्थिरं मन्यते।

अतः समानभावेन नानाधर्ममार्गेषु समवायीकृता अपि जगतो मानवाः धर्मतत्त्वं सर्वप्रधानं मन्वते। सर्वेषु धर्मेषु कर्तव्यपालनस्य, सदाचारपालनस्य, परतत्त्वोपासनायाः मानवतायाः समानतायाः विश्वशान्तेश्चेति सिद्धान्ताः दृष्टिपथमायान्ति। सर्वसुखदमेतदेवास्ति सर्वेषु विश्वधर्मेषु यत् धर्मप्रवर्तकेषु सत्सु, तपस्विषु, महात्मसु तत्तद्धर्मादर्शभूतेषु परमार्थतत्त्वसिद्धेः प्रमाणं लभ्यते- तेन च समाजस्य मानवानाञ्चकल्याणमपि सोदाहरणं दृश्यते। एतदप्यत्रास्त्युल्लेखनीयं यद् विज्ञानविकासात्पूर्वं धर्मतत्त्वे तत्प्रतिपादकशास्त्रेष्वपि तद्विज्ञानं विशिष्टभागरूपेण स्वभावसिद्धं प्रकृतेः कार्यं प्रकृति-संकेतभाषामनुसृत्य कुर्वदासीत्।

आधुनिकविज्ञानमतिरिच्य धर्मतत्त्वं शाश्वतं प्रतिपादयति सामान्यरूपेण भौतिक-दैविकाध्यात्मिक-मानवजीवनानि, पश्यति चान्तरिकं हि संबन्धम् एषु। अद्यैतन्नगण्यते समाजे, अत एव विश्वसमाजे विषमताऽवलोक्यते, अशान्तिश्चानुभूयते। मानवाः मानवान् जिघांसन्ति, आतंकेन भाययन्ति, भौतिक-भोगमदाक्रान्ताश्च केचन पशुमारं हन्ति मानवान्। मानवतायाः वार्ता दूरे तिष्ठति। अस्मिन् पुस्तके नानाधर्मप्रवर्तकमनीषिणां साधकानां धर्मसिद्धानां मानवमूल्यसंस्थापकानाञ्च साधूनां यथोपलब्धजीवनवृत्तान्ताः तेषां मौलिकसन्देशाः उपदेशाश्च गुम्फिताः सन्ति। एतेषां जीवनजीवनवृत्तान्तानाञ्च संकलनं डा. देवराजमहोदयेन सम्पादितात् "विश्व के सन्त महापुरुष" – इत्यस्मात् सन्दर्भ कृतमस्ति, यस्य ग्रन्थस्य प्रस्तावना 'Foreword' – लिखिता वर्तते श्रीमता N.H.Bhagawati महोदयेन।

Scanned with CamScanner

तथैवात्र वैदिकसाहित्यस्य व्याख्याकाराणां केषाञ्चिज्जीवनवृत्तान्ताः समाविष्टाः सन्ति। वयं यथा जानीमो यद्वैदिकसाहित्यं विश्वरिक्थमिवाद्य गण्यते, यस्यान्तरिकः सम्बन्धः न केवलं जेन्द-अवेस्ता- इति ग्रन्थेन सहैवास्ति प्रत्युद्विश्वधर्मसंस्कृतेः सम्यगध्ययनेन सहाप्यस्ति। वैदिकसाहित्यं ग्रीक-लेटिन- आदि भाषासाहित्यं च विश्वमानवतायाः उत्पत्तिविकासज्ञानाय बहुमहत्त्वं बिभ्रति। आधुनिकविज्ञानप्रकाशे, आधुनिक-समाजचिन्तनपरम्पराप्रकाशे च अविरततथ्योद्घाटकानि मानवजीवनमूल्यानि यानि वैदिकसाहित्ये तत्स्तरीयग्रीकादिसाहित्येषु च निहितानि सन्ति तेषामध्ययनं प्रति विश्वयूनां विशेषरूपेण संस्कृतभाषासाहित्यशास्त्राध्ययनरतानां यूनां प्रवृत्तिरुपजायतेति धियोपक्रमोऽयमारब्धोऽस्ति। संस्कृतसाहित्यक्षेत्रे तादृक् – साहित्यप्रकाशनसंकोचमनुभूय कृतोऽयं प्रयासः। वैदिकभाष्यकाराणां विशेषरूपेणात्रोल्लेखः वैदिकच्छात्राणां सौविध्याय कृतो वर्तते। अत्रावधेयमस्ति यत् पाश्चात्यवैदिकचिन्तकाः भारतीय-पारम्परिक-वैदिकभाष्यकाराणां प्रायशः भाष्याण्यधीत्य वैदिकमन्त्राणां ब्राह्मणादीनाञ्चानुवादः कृतो वर्तते, यथा H.H.Wilson कृतः ऋग्वेदानुवादः ग्रिफिथकृतवैदिकसंहितानुवादश्चेति।

अतः कस्यां परिस्थितौ कियत् श्रमेण च तैः पाश्चात्यवैदिकचिन्तकैः वेदानां प्रचारः विश्वसमाजे कृत- इत्यवगमनम् भारतीयैश्छात्रैरस्त्यावश्यम्। प्रायश आलोचना विधीयते नकारात्मिकाऽनधीत्यैव तथ्यं तेषां पाश्चात्यसंस्कृतविदुषां विषये, परन्तु तेषां सकारात्मिका भूमिका कतिपयैः जनैर्नावलोक्यते। तत्सर्वं स्पष्टयितुमपि ग्रन्थ एषः महत्त्वमावहति। विशेषरूपेणास्माकं संस्कृतविश्वविद्यालयेषु अध्ययनरताः छात्राः अस्मिन् सन्दर्भे उपयुक्तसंस्कृतभाषानिबद्धग्रन्थाभावे उदासीनाः दृश्यन्ते, तस्मादप्येषः उपक्रमः प्रारब्धः। **"आनो भद्राः क्रतवः"** – इत्यस्य भावानुसारं वैदिक-ऋषीणां विचाराः शाश्वतवेदमन्त्रेषु संकेतरूपेण प्राप्ताः भवन्ति। ऋषीणां व्यक्तित्वज्ञानेन सह ऋषीणां जीवनमूल्यस्यैतिह्यस्य च सम्पूर्णजगतः कृते एतादृक्-कृतेः प्रकाशनमावश्यकमस्तीति धियाप्येषोपक्रमः कृतो वर्तते।

एतदर्थं नवजीवनप्रकाशनसंस्थानस्य सञ्चालकं श्रीमन्तं पारसमलजी जैनमहोदयं धन्यवादैः, शुभाशंसैः शुभाशीर्वचोभिश्च सभाजयावः आवाम् ग्रन्थसम्पादकौ, येन महोदयेन श्रद्धया, श्रमेण च ग्रन्थकलेवरः, टंकणमुद्रणादीनि च कार्याणि सम्यक् रूपेण सम्पाद्य ग्रन्थोऽयं प्रकाशितः।

आशासे ग्रन्थोऽयं स्वकीयप्रकाशेन **'वसुधैव कुटुम्बकम्'** इति भावनां लोके प्रसारयिष्यतीति।

जयतु सोमनाथः

प्रो. देवेन्द्रनाथपाण्डेयः
डॉ. शत्रुघ्नपाणिग्राही

Scanned with CamScanner

# अनुक्रमाणका

**प्रथमोऽध्यायः**

प्राच्यवेदभाष्यकाराः 1-32

(१) आचार्ययास्कः

(२) स्कन्दस्वामी

(३) नारायणः

(४) उद्गीथः

(५) उवटः

(६) वेङ्कटमाधवः

(७) आनन्दतीर्थः

(८) हलायुधः

(९) सायणाचार्यः

(१०) आचार्य-महीधरः

(११) महर्षिदयानन्दसरस्वती

(१२) योगी श्रीमदरविन्दः

(१३) स्वामिकरपात्रमहाराजः

(१४) पण्डितगोपालचन्द्रमिश्रः

**द्वितीयोऽध्यायः** 33-64

पाश्चात्यवेदभाष्यकाराः

(१) मैक्समूलरः

(२) अलब्रेट वेबरः

(३) आर्थर एण्टोनी मैक्डोनल

(४) गेल्डनरः

(५) ए. बी. कीथः

(६) आर. टी. एच् ग्रिफिथः

(७) हरमन-ओल्डेनवर्गः

(८) जार्जथीबो

(९) डॉ. हर्मन जी. जैकोबी

(१०) पीटर-पीटर्सन

(११) मोरिस विन्टरनित्स

Scanned with CamScanner

(१२) सर विलियम जोन्सः
(१३) हेनरीकरॉथः
तृतीयोऽध्यायः 65-192
प्राच्यधर्ममनीषिणः
(१) तीर्थङ्करः महावीरः
(२) गौतमबुद्धः
(३) आचार्यशङ्करः
(४) आचार्यरामानुजः
(५) महात्मावसवेश्वरः
(६) श्रीमध्वाचार्यः
(७) गुरुनानकः
(८) श्रीस्वामी समर्थरामदासः
(९) श्रीरामकृष्णपरमहंसः
(१०) स्वामिविवेकानन्दः
(११) महामना मदनमोहनमालवीयः
(१२) महात्मागान्धी
चतुर्थोऽध्यायः 193-283
पाश्चात्यधर्ममनीषिणः
(१) हजरत-मूसा
(२) जरथुस्त्रः
(३) लाओत्से
(४) कन्फ्यूशियशः
(५) महात्मासुकरातः
(६) ईशामसीहः
(७) महनीयो मुहम्मदः
मनीषिणां सामान्यसन्देशाः
सन्दर्भग्रन्थसूची

Scanned with CamScanner